Total Pages—6 **UG/III/SANS/H/VIII/18(New)**

# 2018

## SANSKRIT

**[ Honours ]**

PAPER – VIII

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

[ NEW SYLLABUS ]

### GROUP – A

1. यथेच्छं प्रश्नद्वयं समाधेयम् — 10 × 2

(क) न्यायवैशेषिकनये द्रव्याणि कानि ? तमो नाम द्रव्यान्तरमस्ति न वेत्यपि विचारणीयम् ।

( *Turn Over* )

(ख) समवायस्य किं लक्षणम् ? समवायः कुत्र कुत्र वर्तते ? स च एको वा अनेको वा ? विशदं लिख्यताम् ।

(ग) असमवायिकारणस्वरूपं सोदाहरणमुपवर्णनीयम् ।

(घ) आत्मस्वरूपमाश्रित्य प्रबन्धो विरचनीयः ।

2. यथेच्छं द्वितयं संस्कृतेन व्याख्येयम्, उत्तरं च देवनागर्या लेखनीयम् — 5 × 2

(क) रूपरहितस्पर्शवान्वायुः ।

(ख) सन्दिग्धसाध्यवान् पक्षः ।

(ग) संस्कारस्त्रिविधः ।

(घ) असाधारणं कारणं करणम् ।

3. यथेच्छमेकस्य टीका लेख्या — 5

(क) ज्ञानम् ।

(ख) तर्कः ।

(ग) उपाधिः ।

(घ) पाकजरूपम् ।

4. यथेच्छं पञ्चानां प्रश्नानामुत्तरं संस्कृतेन देयम्, लेख्यं च देवनागर्या — 1 × 5

(क) द्रव्यस्य किं लक्षणम् ?

(ख) आकरजं तेजो नाम किम् ?

(ग) विभुद्रव्याणां नामानि लिख्यन्ताम् ।

(घ) शब्दस्य कति भेदाः ? के च ते ?

(ङ) किं कार्यलक्षणम् ?

(च) घटस्य निमित्तकारणं किम् ?

(छ) का नाम शक्तिः ?

(ज) आकाशे विशेषो वर्तते न वा ?

## GROUP – B

5. यथेच्छमेकः प्रश्नः समाधेयः — 10

(क) उपनिषत्सु प्रतिपादितस्यात्मतत्त्वस्य विवरणं समासत उपस्थापनीयम् ।

(ख) बृहदारण्यकोपनिषदि विवृतस्य याज्ञवल्क्यमैत्रेयीसंवादस्य तात्पर्यमालोचनीयम् ।

6. यथेच्छमेकं संस्कृतेन व्याख्याय देवनागर्यां उत्तरं लिख्यताम् — 5

(क) आत्मानं चेद् विजानीयादयमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ॥

(ख) आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम् ।

## GROUP – C

7. यथेच्छमेकः प्रश्नः समाधेयः — 10

(क) श्रीमद्भगवद्गीता कस्मै केनोपदिष्टा ? अस्य ग्रन्थस्य महत्त्वं यथायथं प्रतिपादनीयम् ।

(ख) भगवान् कदा कथमात्मानं सृजति ? विशदमुपपाद्यताम् ।

## GROUP – D

8. यथेच्छमेकस्य प्रश्नस्योत्तरं दीयताम् — 10

(क) आत्मनो देहातिरिक्तत्वं सम्यगुपपादनीयम् ।

(ख) जैनसम्मतः अनेकान्तवादः पर्यालोचनीयः ।

(ग) चार्वाकमतानुसारमनुमानप्रामाण्यं निराकरणीयम् ।

9. कमपि एकं विषयमवलम्ब्य टीका लेख्या — 5

(क) प्रमाणम् ।

(ख) ईश्वरः ।

(ग) परमाणुः ।

10. अधोलिखितेषु दशानां प्रश्नानामुत्तराणि संस्कृतेन देवनागर्या च लेख्यानि — 1 × 10

(क) कानि दर्शनानि वेदप्रामाण्यमनुमन्यन्ते ?

(ख) बौद्धमते भावानां क्षणिकत्वं केन प्रमाणेन सिध्यति ?

(ग) न्यायमते प्रामाण्यं स्वतः ज्ञायते परतो वा ?

(घ) केषाञ्चन बौद्धानां 'वैभाषिक' इति संज्ञायाः किं तात्पर्यम् ?

(ङ) जैनदर्शने पुद्गलशब्दस्य कोऽर्थः ?

(च) वैशेषिकमते आत्मा प्रमाणं वा प्रमेयं वा ?

(छ) किं नाम पञ्चीकरणम् ?

(ज) सांख्यमते उपमानं प्रमाणं भवति न वा ?

(झ) वेदः पौरुषेयः अपौरुषेयो वा ?

(ञ) भामतीटीका कस्य ग्रन्थस्य व्याख्यानम् ?

(ट) अद्वैतमते जगत् सत्यमसत्यं वा ?

(ठ) योगदर्शने योगशब्दस्य कोऽर्थः ?

(ड) मीमांसायाः मुख्यं सम्प्रदायद्वयं किंनामधेयकम् ?

(ढ) वैशेषिकमते केषां द्रव्याणां परमाणवो भवन्ति ?

(ण) अभावस्य पदार्थान्तरत्वं केषां सम्मतम् ?

(त) केवलव्यतिरेकिणो लिङ्गस्योदाहरणमेकं प्रदीयताम् ।

---